# 2025

## SANSKRIT — HONOURS

**Paper : DSCC-5**

**(Drama and Dramaturgy)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Unit – I

**(Marks : 25)**

1. अधोलिखितयोः कस्य***चिदेकस्यो***त्तरं लेख्यम्। 10×1

(a) अभिज्ञानशकुन्तलनाटकस्य प्रथमाङ्कचतुष्टये कालिदासेन समङ्कितं प्रकृतिचित्रमाधारीकृत्य नातिदीर्घः प्रबन्धः लिख्यताम्।

(b) अभिज्ञानशकुन्तलनाटकस्य प्रथमाङ्के समवतारितस्य हस्तिवृत्तान्तस्य नाटकीयं तात्पर्यमालोच्यताम्।

2. अधोलिखितयोः कस्य***चिदेकस्य*** **संस्कृतभाषया देवनागरलिप्या** च सप्रसङ्गं व्याख्या कार्या। 6×1

(a) आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥

(b) विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव॥

3. अधोदत्तयोः **संस्कृतवाक्ययोः** कस्यच***नैकस्य*** प्राकृतरूपं लिख्यताम्। 3×1

(a) इतः इतः सख्यौ।

(b) अनसूये, गमिष्याम्यहम्।

4. अधोलिखितेषु ***त्रयाणां*** प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरलिप्या** च संक्षेपेण लेख्यम्। 2×3

(a) अभिज्ञानशकुन्तलनाटके कति अङ्काः सन्ति? कस्मिन् अङ्के शकुन्तला अभिशप्ता?

(b) तपस्विनः कररूपेण नृपेभ्यः किं ददति?

(c) "आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः"– इति केन कं प्रति उक्तम्?

(d) विदूषकस्य नाम किम्? प्रथमाङ्के तस्योपस्थितिः लक्ष्यते न वा।

(e) राज्ञः दुष्यन्तस्य आश्रमगमनकाले महर्षिः कण्वः कुत्र किमर्थं गतवान्?

## Unit – II

**(Marks : 20)**

5. अधोलिखितयोः कस्यचन***ैकस्य*** उत्तरं लेख्यम्।

(a) अभिज्ञानशकुन्तलनाटकस्य कस्मिन् अङ्के धीवरोपाख्यानं समवतारितम्? अनेनोपाख्यानेन नाटकीयं किमपि तात्पर्यं साधितं न वेति विचार्य तत्र प्राचीनभारतवर्षस्य समाजव्यवस्थायाः प्रतिविम्बितं चित्रमुपस्थाप्यताम्। 1+5+4

(b) का आसीत् हंसपदिका? अभिज्ञानशकुन्तलनाटकस्य कस्मिन् अङ्के तस्याः गीतं श्रूयते? गीतस्यास्य नाटकीयं तात्पर्यमालोच्यताम्। 1+1+8

6. अधोलिखितयोः यथेच्छ***मेकस्य*** **संस्कृतभाषया देवनागरलिप्या** च भावः सम्प्रसार्यताम्। 5×1

(a) हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः।

(b) अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं<br>
शमयति परितापं छायया संश्रितानाम्॥

7. अधोलिखितयोः कस्यचि***देकस्य*** वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। 5×1

(a) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्<br>
पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः।<br>
तच्चेतसा स्मरति नूनमबोधपूर्वं<br>
भावस्थिराणि जननान्तरसौहृदानि॥

(b) स्वप्नो नु माया नु मतिभ्रमो नु<br>
क्लिष्टं नु तावत् फलमेव पुण्यम्।<br>
असन्निवृत्त्यै तदतीतमेते<br>
मनोरथा नाम तटप्रपाताः॥

## Unit – III

**(Marks : 30)**

8. अधोलिखितयोः कस्यचिदेक**कस्यो**त्तरं लेख्यम्।

(a) का प्रस्तावना? तस्याः कति भेदाः? कानि च तेषां नामानि? तेषु यथाभिमतं द्वयोः सोदाहरणं व्याख्या कार्या। 2+1+1+6

(b) नाट्यसन्धेः विश्वनाथसम्मतं लक्षणं किम्? तस्य कति भेदाः? कानि च तेषां नामानि? तेषु यथेच्छं द्वयोः सोदाहरणं व्याख्या कार्या। 2+1+1+6

9. यथाभिमतं ***विषयद्वय***मवलम्ब्य टीका लेखनीया। 5×2

(a) रूपकम्।

(b) नान्दी।

(c) पूर्वरङ्गः।

10. यथाभिमतं ***पञ्चानां*** प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरलिप्या** च संक्षेपेण लेख्यम्। 2×5

(a) कः अभिनयः? स कतिविधः?

(b) विश्वनाथस्य मते कौ द्वौ रसौ नाटके अङ्गिरसरूपेण स्वीक्रियेते?

(c) नान्दी कतिविधा? तेषां नामानि लिखतु।

(d) विश्वनाथसम्मतं पताकालक्षणं लिखित्वा, उदाहरणमेकं देयम्।

(e) अर्थोपक्षेपकस्य कति भेदाः? तेषु द्वयोः नाम लिख्यताम्।

(f) का अर्थप्रकृतिः? सा कतिविधा?

(g) विश्वनाथसम्मतं भारतीवृत्तिलक्षणं लिख्यताम्।

(h) कति वृत्तयः? शृङ्गाररसे का वृत्तिः प्रयोक्तव्या?

---

# 2025

## SANSKRIT — HONOURS

**Paper : DSCC-6**

**(Gītā and Upaniṣad)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Unit – I**

**(Marks : 25)**

1. अधोलिखितयोः यथामति ***एकतरस्य*** प्रश्नस्य उत्तरं प्रदीयताम्।

   (a) गुणाः कतिविधाः? के च ते? तेषां स्वरूपाणि निरूप्यन्ताम्। 1+3+6

   (b) "मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।" – श्लोकांशोऽयं कुत्र समुपलभ्यते? कस्येयमुक्तिः? वचनस्यास्य आशयः विस्तरेण व्याख्यायताम्। 2+1+7

2. अधोलिखितयोः श्लोकयोः यथेच्छम् ***एकतरस्य*** सप्रसङ्गं व्याख्या विधीयताम्। 6×1

   (a) इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
   मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥

   (b) सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च।
   प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥

3. अधोलिखितयोः ***एकतर***माश्रित्य संक्षिप्ता टीका विलिख्यताम्। 5×1

   प्रकृतिः, महाभूतानि।

4. अधोलिखितेषु यथेच्छं ***द्वितयस्य*** उत्तरं **संस्कृतभाषया देवनागरलिप्या** च प्रदीयताम्। 2×2

   (a) श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति? तत्र कस्मिन् अध्याये कर्मयोगः उपदिष्टः?

   (b) "तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन।"– कस्येयमुक्तिः? कुरुनन्दनशब्देनात्र कः सम्बोधितः?

   (c) चक्षुषः विषयः कः, श्रोत्रस्य च को विषयः?

## Unit – II

**(Marks : 30)**

5. अधोलिखितयोः यथामति ***एकतरस्य*** प्रश्नस्य उत्तरं प्रदीयताम्।

(a) "उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये॥"– श्लोकांशोऽयं कुत्र समुपलभ्यते? कस्येयमुक्तिः? प्रसङ्गेऽस्मिन् उपदिष्टस्य ध्यानयोगस्य पद्धतिः भवदीयपाठ्यांशमवलम्ब्य पर्यालोच्यताम्। 1+1+8

(b) बुद्धेः कति भेदाः? के च ते? श्रीमद्भगवद्गीतायाः अष्टादशाध्यायम् आश्रित्य तेषां लक्षणानि निरूप्यन्ताम्। 1+3+6

6. अधोलिखितयोः श्लोकयोः यथाभिलषितम् ***एकतरस्य*** सप्रसङ्गं व्याख्या कार्या (**संस्कृतभाषया देवनागरलिप्या** च)। 6×1

(a) योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥

(b) न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥

7. अधोलिखितयोः यथेच्छम् ***एकतर***माश्रित्य संक्षिप्ता टीका विलिख्यताम्। 5×1

लोकसंग्रहः, स्थितप्रज्ञः।

8. अधोलिखितयोः ***एकतरस्य*** श्लोकस्य **वङ्गभाषायाम् आङ्गलभाषायां** वा अनुवादः कार्यः। 5×1

(a) यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्॥

(b) यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥

9. अधोलिखितेषु यथेच्छं ***द्वितयस्य*** उत्तरं **संस्कृतभाषया देवनागरलिप्या** च प्रदीयताम्। 2×2

(a) "क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।"– अत्र परन्तपशब्देन कः सम्बोधितः? शब्दस्यास्य कोऽर्थः?

(b) को नाम प्रशान्तात्मा?

(c) "त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।"– किं नाम नरकस्य द्वारत्रयम्?

## Unit – III

**(Marks : 20)**

**10.** अधोलिखितेषु ***द्वितय***माश्रित्य टीका विरच्यताम्। 6×2

(a) श्रद्धा

(b) भक्तिः

(c) योगी।

**11.** अधोलिखितयोः यथामति ***एकतरस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः कार्यः। 5×1

(a) कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसंमूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।।

(b) अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्।।

**12.** अधोलिखितेषु यथामति ***त्रितयस्य*** उत्तरं **संस्कृतभाषया देवनागरलिप्या** च लिख्यताम्। 1×3

(a) रिक्तस्थानं पूरयितव्यम्।
"सर्वकर्मफलत्यागं ततः कुरु ________"।

(b) "स मामेति पाण्डव।"– अत्र स इति पदेन क उपदिष्टः?

(c) 'विदधाम्यहम्' इत्यस्य सन्धिविच्छेदः कार्यः।

(d) सर्वेषु कालेषु कोऽनुस्मरणीयः?

(e) "तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः"– कस्य उक्तिरियम्?

# 2025

## SANSKRIT — HONOURS

### Paper : DSCC-7

### (Grammatical Study and Linguistics)

### Full Marks : 75

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Unit – I

### (Marks : 35)

1. यथेच्छ**मेकः** प्रश्नः समाधेयः। 10×1

(a) भट्टिकाव्यमाधारीकृत्य शरदः सौन्दर्यं समासेन वर्णयत।

(b) "दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।"–उक्तेरस्याः तात्पर्यं विवृणुत।

2. अधोलिखितयोः कस्यचित् **एकस्य संस्कृतभाषया देवनागरलिप्या** च सप्रसङ्गं व्याख्या कार्या। 7×1

(a) विम्बागतैस्तीरवनैः समृद्धिं
निजां विलोक्यापहृतां पयोभिः।
कुलानि सामर्षतयेव तेनुः
सरोजलक्ष्मीं स्थलपद्महासैः॥

(b) अदृक्षताम्भांसि नवोत्पलानि
रुतानि चाश्रौषत षट्पदानाम्।
आघ्रायि वान् गन्धवहः सुगन्ध–
स्तेनारविन्दव्यतिषङ्गवांश्च॥

3. अधोलिखितयोः कस्यचित् **एकस्य संस्कृतभाषया देवनागरलिप्या** च भावः सम्प्रसार्यताम्। 5×1

(a) न गुञ्जितं तन्न जहार यन्मनः।

(b) न मानिनी संसहतेऽन्यसङ्गमम्।

**4.** वङ्गभाषया आङ्गलभाषया वा अधस्तनयोः कस्य***चिदेकस्य*** श्लोकस्य अनुवादः करणीयः। 5×1

(a) दत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः।
आकर्णयन्नुत्सुकहंसनादान्
लक्ष्ये समाधिं न दधे मृगावित्॥

(b) तं यायजूकाः सह भिक्षुमुख्यै-
स्तपःकृशाः शान्त्युदकुम्भहस्ताः।
यायावराः पुष्पफलेन चान्ये
प्राणर्चुरर्च्या जगदर्चनीयम्॥

**5.** अधोलिखितेषु ***प्रश्नद्वयम्*** संक्षेपेण **संस्कृतभाषया देवनागरलिप्या** च समाधेयम्। 2×2

(a) किं खलु भट्टिकाव्यस्य अपरं नाम? अस्य काव्यस्य विरचने किमासीत् कवेरुद्देश्यम्?

(b) "मन्ये व्यतिस्ते ममापि धर्मः"– केन कं प्रति उक्तमिदम्?

(c) कति सर्गाः सन्ति भट्टिकाव्ये? अस्य द्वितीयसर्गस्य नाम किम्?

**6.** कयो***र्द्वयो***र्वा व्याकरणसम्मता टिप्पणी कार्या। 2×2

(a) हरिणं जिघांसुः

(b) यायजूकाः

(c) मृगावित्।

## Unit – II

**(Marks : 40)**

**7.** यथेच्छ***मेकतरस्य*** उत्तरं देयम्।

(a) कर्मकारकविधायकं प्रधानं पाणिनिसूत्रं समुल्लिख्य तस्य दीक्षितमतानुसारेण व्याख्या कार्या। ततः कर्मणि षष्ठी-विभक्तिप्रयोगस्य सूत्रमेकं तथा कर्मणि सप्तमीविभक्तिप्रयोगस्य सूत्रमेकं च सोदाहरणं लेखनीयम्। 2+4+2+2

(b) अपादानकारकविधायकं प्रधानं पाणिनिसूत्रं सोदाहरणमुल्लिख्य दीक्षितवचनानुसारेण साधु व्याख्यायताम्। कर्मणि पञ्चमी-विभक्तिप्रयोगस्य सूत्रम् एकं तथा अधिकरणे पञ्चमी-विभक्तिप्रयोगस्य सूत्रम् एकं च सोदाहरणं लेखनीयम्। 2+4+2+2

**8.** यथाभिमतं सूत्र***मेकं*** दीक्षितवचनानुसारेण **संस्कृतभाषया देवनागरलिप्या** च व्याख्येयम्। 6×1

(a) साधकतमं करणम्।

(b) स्पृहेरीप्सितः।

**9.** अधोनिर्दिष्टयोः कस्यचन***ैकस्य*** आशयः स्पष्टीकरणीयः। 6×1

(a) अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः।

(b) विनापि तद्योगं तृतीया 'वृद्धो यूना'– इत्यादि निर्देशात्।

**10.** अधोदत्तयोः विषययोः यथाभिमतं ***एकस्य*** टीका कार्या। 4×1

(a) अकथितं कर्म।

(b) अपवर्गः।

**11.** अधोलिखितेषु ***त्रयाणाम्*** प्रशनानामुत्तरं **संस्कृतभाषया देवनागरलिप्या** च लेख्यम्। 2×3

(a) सम्प्रदानकारकविधायकं प्रधानं पाणिनिसूत्रं किम्?

(b) किं नाम कर्मप्रवचनीयम्?

(c) निर्धारणे का विभक्तिः भवति? उदाहरणमेकं लिख्यताम्।

(d) अधिकरणस्य किं लक्षणम्?

(e) अनादरे का विभक्तिः भवति? उदाहरणमेकं दीयताम्।

**12.** अधोरेखाङ्कितेषु पदेषु ***चतुर्णां*** कारकविभक्तिप्रयोगः सकारणं सूत्रोल्लेखपूर्वकं च निर्णेयः। (**संस्कृतभाषया देवनागरलिप्या** च) 2×4

(a) स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।

(b) पापे अभिनिवेशः।

(c) शिष्यः उपाध्यायात् शास्त्रमधीते।

(d) मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।

(e) केशेषु चमरीं हन्ति।

(f) स्फुटोपमं भूतिसितेन शम्भुना।

# 2025

## SANSKRIT — HONOURS

### Paper : DSCC-8

### (Smṛti Literature : Ancient Indian Science of Polity and Administration)

### Full Marks : 75

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Unit – I**

**(Marks : 25)**

1. यथेच्छ***मेकतरस्य*** उत्तरं देयम्।

(a) धर्मलक्षणं संक्षेपेण प्रतिपाद्य धर्मशास्त्रधर्मसूत्रयोः पार्थक्यं प्रदर्शयत। 4+6

(b) को नाम निबन्धः? वङ्गीयनिबन्धकारस्य रघुनन्दनस्य कृतिः यथामति आलोचनीया। 2+8

2. अधःप्रदत्तेषु यथाकामं टीका***द्वयं*** लेख्यम्। 5×2

(a) गौतमः

(b) पराशरः

(c) कामन्दकीयनीतिसारः।

3. यथाकामं प्रश्न***पञ्चकं*** **संस्कृतभाषया देवनागरलिप्या** च समाधेयम्। 1×5

(a) धर्मशास्त्रस्य मुख्यः उत्सः कः?

(b) याज्ञवल्क्योपनिबद्धेषु धर्मशास्त्रप्रवर्त्तकेषु यथामति द्वयोः नामोल्लेखः कार्यः।

(c) नीतिशब्दस्य व्युत्पत्तिः का?

(d) अर्थशास्त्रे अर्थशब्दस्य कोऽर्थः?

(e) नारदानुसारं विवादपदानि कति?

(f) व्यवहारमातृकायाः प्रणेता कः?

(g) याज्ञवल्क्यसंहितायाः एकस्याः प्रसिद्धायाः टीकायाः नाम लेख्यम्।

(h) 'दीपकलिका'–इति टीका केन प्रणीता?

## Unit – II

**(Marks : 30)**

4. यथेच्छ***मेकतरस्य*** उत्तरं प्रदेयम्।

(a) किं नाम व्यसनम्? व्यसनमरणयोर्मध्ये किं तावद् अधिककष्टकरं भवति? मनुसंहितायाः सप्तमाध्यायानुसारं कामजव्यसनमधिकृत्य कश्चन लघुनिबन्धः प्रस्तूयताम्। 2+1+7

(b) मनुमनुसृत्य दण्डस्य उत्सं, स्वरूपम्, उपयोगं च आधारीकृत्य नातिदीर्घः प्रबन्धः लिख्यताम्। 2+4+4

5. कश्चि***देको*** व्याख्येयः। 6×1

(a) एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम्।।

(b) यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः।।

6. यथेच्छ***मेकस्य*** वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। 4×1

(a) अद्यात्काकः पुरोडाशं श्वावलिह्याद्धविस्तथा।
स्वाम्यञ्च न स्यात्कस्मिंश्चित्प्रवर्तेताधरोत्तरम्।।

(b) समोत्तमाधमै राजा त्वाहूतः पालयन्प्रजाः।
न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मरन्।।

7. संक्षिप्ता टीप्पणी लेख्या। 4×1

(a) गिरिदुर्गम्

*अथवा,*

(b) उपायचतुष्टयम्।

8. यथाकामं प्रश्न***त्रयं*** **संस्कृतभाषया देवनागरलिप्या** च समाधेयम्। 2×3

(a) मनुसंहितायां कति अध्यायाः सन्ति? तस्याः उपरि कुल्लूकभट्टेन विरचितायाः टीकायाः नाम किम्?

(b) ईश्वरः केन उपादानेन नृपं सृष्टवान्?

(c) शिलोञ्छं किम्?

(d) कुलं किम्?

(e) वैनयिकी क्रिया का?

## Unit – III

**(Marks : 20)**

9. अधोलिखितयोः कस्य**चिदेकस्यो**त्तरं लेख्यम्।

(a) कौटिल्यनये विद्या कतिविधा? तेषु प्रदीपतुल्या का? तस्याः स्वरूपं कौटिल्यानुसारम् आलोचयत। 1+1+8

(b) अर्थशास्त्रानुमतं त्रय्याः स्वरूपं लेख्यम्। सा विद्या कथं वर्णानामाश्रमाणाञ्च औपकारिकी तद्वैशद्येन आलोच्यताम्। 3+7

10. अधोदत्तेभ्यो यथामति ***द्वयस्य*** संक्षिप्ता टिप्पणी लेख्या। 3×2

(a) वार्ता

(b) मात्स्यन्यायः

(c) योगक्षेमम्।

11. यथाभिलषितं प्रश्न***द्वयं*** साध्यम्। 2×2

(a) कौटिलीयार्थशास्त्रस्य एकस्याः प्रसिद्धायाः टीकायाः नामोल्लेखः कार्यः। तस्याः प्रणेतुर्नाम च लेख्यम्।

(d) का नाम लोकयात्रा?

(e) यथार्हदण्डः कथं पूज्यः?

---